**SUMMATIVE ASSESSMENT-III - 2025-26 ( MODEL)** B

First Language Part I- Paper-I

**SANSKRIT**

(For Academic and Oriental Sanskrit Schools)

**Time 1 ½ Hours** **Class- X**

**Cool of time - 15. Minutes** **Max Score - 40**

**निर्देशाः -**

- 15 निमेषाः समाश्वासकालः ।
- प्रश्नान् निर्देशान् च सम्यक् अवगम्य एव उत्तराणि लेखनीयानि ।
- उत्तरलेखने मूल्याङ्काः कालः च परिगणनीयाः।
- विवर्तनप्रश्नाद् ऋते सर्वेषां प्रश्नानाम् उत्तरलेखने देवनागरीलिपिरुपयोक्तव्या ।

© STATE ASSESSMENT CELL - SCERT KERALA

**भागः - 1**

**1. अधोदत्तेभ्यः गणेभ्यः असाधु गणं चित्वा लिखत ।** **(1)**

**क)** मधुकरिका - हे मधुकरिके ! **ख)** अज्जुका - हे अज्जुके !

**ग)** वत्सः - हे वत्से ! **घ)** वसन्तसेना - हे वसन्तसेने !

**2. अधोदत्तपट्टिकां पठित्वा उचितरूपेण युक्तं गणं चित्वा लिखत ।** **(1)**

| सस्यम् | औषधगुणम् |
|---|---|
| १. आमलकी | अ) रोगाणुनाशिनी। |
| २. हरीद्रा | आ) स्मृतिवर्धकम् । |
| ३. ब्रह्मी | इ) वातहरणम् । |
| | ई ) ऊर्जप्रदायिनी । |

**क)** १- ई २. - अ ३. - आ

**ख)** १- इ २. - अ ३. - ई

**ग)** १- आ २. - इ ३. - अ

**घ)** १- ई २. - इ ३. - आ

**3. प्रस्तावनाद्वयं पठत । अधोदत्तेभ्यः साधु उत्तरं किमिति लिखत ।** **(1)**

१. सोपानसङ्गीतम् अनुष्ठानकला भवति ।

२. तेय्यं सुकुमारकलारूपमस्ति ।

**क)** १ साधु ।

**ख)** २ साधु ।

**ग)** १ , २ असाधु ।

**घ)** १ , २ साधु ।

**4. अधोदत्तप्रस्तावनां कारणं च पठित्वा उचितमुत्तरं चित्वा लिखत।** **(1)**

प्रस्तावना - भगवदज्जुकम् प्रहसनम् भवति।

कारणम् - प्रहसनम् हास्यप्रधानं भवति ।

**क)** प्रस्तावना साधु कारणम् असाधु । **ख)** प्रस्तावना असाधु कारणं साधु।

**ग)** प्रस्तावना कारणं च असाधु । **घ)** प्रस्तावना कारणं च साधु ।

**भागः - 2**

**5. "आकाशं वीक्ष्य सिंहः उच्चैः गर्जति।" इति आशययुक्तां कवितापङ्क्तिं चित्वा लिखत।** **(2)**

**क)** वनशिलातलमेत्य तारापथं वीक्ष्य
मृगकुलाधीशस्य घनगर्जनम्।

**ख)** नवलताकुञ्जेषु नित्यं वनप्रियैः
कृतमहो! सङ्गीतरससेचनम्॥

**6. (I)अधोदत्तसंख्यै अक्षररूपेण लिखत।** **(2)**

**क)** २०२५ - ................................................................................ ।

**ख)** १९०३ - ................................................................................।

**अथवा**

**(II) संख्यारूपेण लिखत।**

**क)** पञ्चाशीत्यधिक अष्टशतोत्तरसहस्रम् - .......................... ।

**ख)** सप्तविंशत्यधिक द्विसहस्रम् - .......................... ।

**7. अधोदत्तस्य पदच्छेदस्य संश्लिष्टपदं लिखत ।** **(2)**

**क)** प्रमुखः + अस्ति। - ...........................

**ख)** ग्रन्थे + एव। - ..........................

**8. (I) 'समीपम्' इति पदस्य स्थाने 'परितः' इति उपयुज्य वाक्यं परिवर्तयत।** **(2)**

**उदा -** विद्यालयस्य समीपं छात्राणां भवनानि सन्ति।
विद्यालयं परितः छात्राणां भवनानि सन्ति।

**(क)** आतुरालयस्य समीपं वाहनानि सन्ति।

.............................................................................. ।

**अथवा**

**(II) अधोरेखाङ्कितपदस्य शत्रन्त - शानजन्त रूपं उपयुज्य वाक्यं परिवर्तयत।**

**क)** रमेशः गणितं <u>**लिखति**</u> पठति च। (लिख् - शत्रन्तम्)

**ख)** वृक्षः झण्डावातेन <u>**कम्पते**</u> पतति च। (कम्प्- शानजन्तम्)

© STATE ASSESSMENT CELL - SCERT KERALA

**9. श्लोकं पठित्वा अधोदत्तानां प्रश्नानाम् उत्तराणि लिखत।** **(2)**

तं प्राप्य सर्वावयवानवद्यं
व्यावर्ततान्योपगमात्कुमारी।
न हि प्रफुल्लं सहकारमेत्य
वृक्षान्तरं काङ्क्षति षट्पदाली॥

**क)** का वृक्षान्तरं गन्तुं न इच्छति ?

**ख)** अन्यः वृक्षः इत्यस्य एकपदं लिखत।

**10. किं गणे न अन्तर्भवति ।** **(2)**

**क)** नृत्तम् , पद्यम्, गीतम् , वाद्यम् - ...............................

**ख)** सञ्चयन् , मुरारिः , उरूब्, कोविलन् - ...............................

**11. गद्यभागं पठित्वा उचितं समस्तपदं चित्वा लिखत।** **(2)**

आचार्यः शिष्यम् आहूय अवदत् - हे वत्स, इदानीं स्वभवनं गच्छतु। मातापितरौ त्वां द्रष्टुम् इच्छतः। त्वं सर्वदा मातृदेवो भव। पितृदेवोऽपि भव।

**क)** आचारं ग्राहयति इति - ...........................

**ख)** माता च पिता च - ...........................

**12. उचितेन अव्ययरूपेण रिक्तस्थानं पूरयत।** **(3)**

**क)** बालकः संस्कृतं .............. गच्छति। ( पठ् - क्त्वान्तम् )

**ख)** गजः जलं .................... नदीं गच्छति। ( पा - तुमुन्नन्तम् )

**ग)** शिशुः मातुः समीपम् ................... वदति। ( आ + गम् - ल्यबन्तम् )

**13. उचितं ध्येयवाक्यं चित्वा लिखत।** **(3)**

**( शं नो वरुणः, शं नो भूयात्, सत्यमेव जयते, योगक्षेमं वहाम्यहम् )**

**क)** एल्. ऐ. सि - ....................................।

**ख)** भारतसर्वकारः - ....................................।

**ग)** भारतीय नाविकसेना - ....................................।

© STATE ASSESSMENT CELL SCERT KERALA

**14. प्रादेशिकभाषया आशयानुसारं विवर्तयत।** (4)

भारते जनुवरिमासस्य द्वादशदिनाङ्के युवजनदिनम् आचर्यते। एतत् दिनं स्वामिनः विवेकानन्दस्य जन्मदिनं भवति । राष्ट्रस्य परिपोषणे युवजनशक्तिः अत्यावश्यमेव इति विवेकानन्दः पुनः पुनः उद्घोषितवान् । परोपकाराय सः युवजनान् प्रेरितवान् च । इदानीं विवेकानन्दस्य स्मारकं कन्याकुमार्यं वर्तते।

**15. (I) उपनिषत् इति विषये लघुटिप्पणीं लिखत।** **(4)**

**श्रद्धेयाः अंशाः -** वैदिकसाहित्यम् - वेदाः- वेदान्तः - दशोपनिषदः - ऋषीणां दर्शनानि।

**अथवा**

**(II) भगवदज्जुकम् अधिकृत्य लघुटिप्पणीं लिखत।**

**श्रद्धेयाः अंशाः** - काव्यभेदः - दृश्यकाव्यम् - रूपकाणि - प्रहसनम् - - भगवदज्जुकम् - बोधायनः - हास्यरसप्रधानम्।

**16. (I) संभाषणांशान् पूरयत।** **(4)**

बालकः - महाशय ! नमस्कारः। .................................

कलाकारः - वत्स ! मम नाम रामन् आशान् इति।

बालकः - भवान् कथं पटयणी कलाकारः आभवत् ?

कलाकारः - मम पिता, पितामहः च ..................................।

बालकः - अहो ! पटयणीकला युष्माकं पारम्पर्यकला अस्ति वा ?

कलाकारः - आम्। अस्माकं ......................................।

बालकः - ....................................................।

**अथवा**

**(II) खण्डिकां संभाषणरूपेण परिवर्त्य लिखत।**

नमस्ते! आचार्यं दृष्ट्वा रमेशः अवदत् । किमर्थम् आगतोऽसि इति आचार्यः अपृच्छत्। तेय्यम् इति कलारूपमधिकृत्य पठनाय आगतवान् इति रमेशस्य वचनं श्रुत्वा कस्य तेय्यरूपस्य विवरणम् आवश्यकमिति आचार्यः पुनरपि अपृच्छत् । कतिवन्नूर्वीरस्य चरितं श्रोतुम् इच्छामि इति रमेशः प्रत्यवदत्।

© STATE ASSESSMENT CELL - SCERT KERALA

**17. (I) सूचनानुसारं जीवनचरितं लिखत ।** (4)

| | | |
|---|---|---|
| नाम | - | एन्. वि. कृष्णवार्यर् |
| जन्म | - | 1916 मेय् 13 तृश्शूर् |
| पितरौ | - | अच्युतवार्यर्, माधविवारस्यार् |
| कर्ममण्डलम् | - | अध्यापकः, पत्रप्रवर्त्तकः । |
| कृतयः | - | असति, अमेरिक्कयिलूटे, वेल्लुविलिकलुं प्रतिकरणङ्लुम् इत्यादयः। |
| पुरस्कारः | - | केरलसाहित्य अक्कादमीपुरस्कारः |
| मृत्युः | - | 1989 ओक्टोबर् 12 |

**अथवा**

**(II) अधोरेखाङ्कितं पदं परिष्कृत्य वाक्यं शुद्धीकुरुत ।**

**क)** अहं संस्कृतं **पठति** ।

**ख)** वने **वृक्षः** तिष्ठन्ति ।

**घ)** पुस्तके **पद्यं** ऋते अन्यत् सर्वम् अस्ति ।

**ग)** **भवान्** संस्कृतं पठ ।

© STATE ASSESSMENT CELL - SCERT KERALA

**SUMMATIVE ASSESSMENT-III - 2025-26 ( MODEL)** B

First Language Part I- Paper-I

**SANSKRIT**

(For Academic and Oriental Sanskrit Schools)

**Time 1 ½ Hours** **Class- X**

**Cool of time - 15. Minutes** **Max Score - 40**

# ANSWER KEY

| प्रश्न संख्या | अङ्काः | उत्तराणि /मूल्यनिर्णयसूचकाः | अनुबन्धसूचनाः |
|---|---|---|---|
| 1 | **1** | **ग)** वत्सः - हे वत्से ! | ग) इति लिखति चेत् (1) |
| 2 | **1** | **क)** १- ई २. - अ ३. - आ | क) इति लिखति चेत् (1) |
| 3 | **1** | **क)** १ साधु। | क) इति लिखति चेत् (1) |
| 4 | **1** | **घ)** प्रस्तावना कारणं च साधु । | घ) इति लिखति चेत् (1) |
| 5 | **2** | **क)** वनशिलातलमेत्य तारापथं वीक्ष्य मृगकुलाधीशस्य घनगर्जनम्। | क) इति लिखति चेत् (1) |
| 6 | **2** | **क)** २०२५ - पञ्चविंशत्यधिकद्विसहस्रम्।<br>**ख)** १९०३ - त्र्यधिक एकोनविंशतिशतम्।<br>**क)** १९७५<br>**ख)** २०२७ | एकैकस्य उत्तरस्य कृते प्रत्येकम् अङ्कः। अन्यस्य समीचीनस्य अत्तरस्य कृते अङ्कः। |
| 7 | **2** | **क)** प्रमुखः + अस्ति।- **प्रमुखोऽस्ति।**<br>**ख)** ग्रन्थे + एव। - **ग्रन्थ एव।** | एकैकस्य उत्तरस्य कृते प्रत्येकम् अङ्कः। |
| 8 | **2** | **क)** आतुरालयं परितः वाहनानि सन्ति। | उचितस्य वाक्यपरिवर्तनस्य कृते अङ्कद्वयम्। |
| | | **क)** रमेशः गणितं **<u>लिखन्</u>** पठति ।<br>**ख)** वृक्षः झण्डावातेन **<u>कम्पमानः</u>** पतति। | उचितस्य वाक्यपरिवर्तनस्य कृते एकौकः अङ्कः । |
| 9 | **2** | **क)** षट्पदाली।<br>**ख)** वृक्षान्तरम् । | एकैकस्य उत्तरस्य कृते एकैकः अङ्कः। |
| 10 | **2** | **क)** पद्यम्।<br>ख) मुरारिः। | उचितस्य उत्तरस्य कृते एकैकः अङ्कः । |
| 11 | **2** | **क)** आचार्यः।<br>**ख)** मातापितरौ। | उचितस्य उत्तरस्य कृते एकैकः अङ्कः । |

© STATE ASSESSMENT CELL - SCERT KERALA

| | | | |
|---|---|---|---|
| 12 | **3** | **क)** बालकः संस्कृतं **पठित्वा** गच्छति।<br>**ख)** गजः जलं **पातुं** नदीं गच्छति।<br>**ग)** शिशुः मातुः समीपम् **आगत्य** वदति। | उचितस्य उत्तरस्य कृते एकैकः अङ्कः। |
| 13 | **3** | **क)** एल्. ऐ. सि- **योगक्षेमं वहाम्यहम्।**<br>**ख) भारतसर्वकारः - सत्यमेव जयते।**<br>**ग)** भारतीयनाविकसेना - **शं नो वरुणः।** | उचितस्य उत्तरस्य कृते एकैकः अङ्कः। |
| 14 | **4** | आशयशोषणं विना विवर्तनम्। | आशयस्वांशीकरणाय (2)<br>उचितभाषाप्रयोगाय (2) |
| 15 | **4** | उचितरीत्या टिप्पणीलेखनम्। | शीर्षकलेखनाय (1)<br>आशयव्यक्ततायै (2)<br>भाषाशुद्ध्यै (1) |
| | | उचितरीत्या टिप्पणीलेखनम्। | |
| 16 | **4** | बालकः - महाशय ! नमस्कारः। **भवतः नाम किम् ?**<br>कलाकारः- मम पिता, पितामहः च **पटयणिकलाकारः आसीत्।**<br>कलाकारः - आम्। अस्माकं **पारम्पर्यकला भवति।**<br>बालकः - **धन्यवादः।/.......।** | उचितपूरणाय एकैकः अङ्कः। |
| | | उचितस्य सम्भाषणस्य निर्माणाय एकैकः अङ्कः। | |
| 17 | **4** | उचितरीत्या टिप्पणीलेखनम्। | शीर्षकलेखनाय (1)<br>आशयव्यक्ततायै (2)<br>भाषाशुद्ध्यै (1) |
| | | **क)** अहं संस्कृतं **पठामि।**<br>**ख)** वने **वृक्षाः** तिष्ठन्ति।<br>**घ)** पुस्तके **पद्यात्** ऋते अन्यत् सर्वम् अस्ति।<br>**ग) त्वं** संस्कृतं पठ। | उचितरीत्या शुद्धीकरणे एकैकः अङ्कः। |
| आहत्य | **40** | | |

© STATE ASSESSMENT CELL - SCERT KERALA